# Vishnukritam Shiva Stotram 2

# વિષ્ણુકૃતં શિવસ્તોત્રમ્ ૨

## Document Information

Text title : Vishnukritam Shiva Stotram 2

File name : viShNukRRitaMshivastotram2.itx

Category : shiva, stotra, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 550-568||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

Vishnukritam Shiva Stotram 2

# વિષ્ણુકૃતં શિવસ્તોત્રમ્ ૨

વિષ્ણુરુવાચ -
નમામિ વિશ્વેશ્વરમાદિદેવં નમામિ વિશ્વોત્તમમીશમેકમ્ ।
નમામિ સર્વાધિકમપ્રમેયં નમામિ શમ્ભું ગિરિજાસહાયમ્ ॥ ૫૫૦॥

નમામિ કાલાન્તકમુગ્રમીશં નમામિ ખટ્વાઙ્ગધરં મહેશમ્
નમામિ સોમાનલભાસ્કરાક્ષં નમામિ વાહીકૃતસન્મહોક્ષમ્ ।
નમામિ સર્વાધિકકણ્ઠભૂષં નમામિ નાનાવિધદિવ્યવેષમ્
નમામિ શુદ્ધોત્તમભૂતિભૂષં નમામિ સંરક્ષિતભૂતશેષમ્ ॥ ૫૫૨॥

નમામિ સર્વાઙ્ગમવેદ્યમાદ્યં નમામિ માયારહિતં વિશુદ્ધમ્ ।
નમામિ લોકૈકનિદાનભૂતં નમામિ નાનાવિધસૃષ્ટિહેતુમ્ ॥ ૫૫૩॥

નમામિ નાગેશસમર્ચિતાઙ્ઘ્રિં નમામિ શુદ્ધેન્દુકલાવતંસમ્ ।
નમામ્યનેકેન્દુરવિપ્રભાસં નમામિ નિત્યં કરુણાર્દ્રભાવમ્ ॥ ૫૫૪॥

નમામિ રમ્યોત્તમવક્ત્રચન્દ્રં નમામિ દીર્ઘોરુહિરણ્યબાહુમ્ ।
નમામિ શાન્તાચ્છહિરણ્યરૂપં નમામિ દિવ્યોરુહિરણ્યવર્ણમ્ ॥ ૫૫૫॥

નમામિ સોમં વૃષરાજકેતું નમામિ શર્વં વરધર્મસેતુમ્ ।
નમામિ ભીમં જગદેકનાથં નમામિ રુદ્રં જનમોક્ષહેતુમ્ ॥ ૫૫૬॥

નમામિ વીરેશ્વરમુગ્રવીર્યં નમામિ દેવં ભવનીલકણ્ઠમ્ ।
નમામિ સર્વાતિહરં સુરેશં નમામિ દીર્ઘોરુજટાકલાપમ્ ॥ ૫૫૭॥

શિવ એવ શરણ્યપુણ્યમૂર્તિઃ શિવ એવાખિલદેવચક્રવર્તી ।
શિવ એવ વિદારિતામરાર્તિઃ શિવ એવાખિલવેદગીતકીર્તિઃ ॥ ૫૫૮॥

ત્વદન્યં શરણ્યં વરેણ્યં ન જાને ન જાને શિવામેયકુમ્ભેઙ્જજાને ।
ત્વદન્યો ન દેવસ્ત્વદન્યૌ ન દેવસ્ત્વદન્યો ન દેવસ્ત્વદન્યો ન દેવઃ ॥ ૫૫૯॥

ત્વમેવ પ્રભુઃ સર્વલોકૈકનાથસ્ત્વમીશસ્ત્વમારાધ્યભૂતસ્ત્વમેવ ।

ત્વદન્યો ન પૂજ્યસ્ત્વદન્યો ન પૂજ્યસ્ત્વમેવાસિ પૂજ્યસ્ત્વમેવાસિ સેવ્યઃ ॥ ૫૬૦॥

ત્વદન્યત્પરં વસ્તુ માસ્ત્યેવ લોકે ત્વદન્યો ન વેદાન્તવેદ્યઃ પરેશઃ ।
ત્વમેવાસિ સર્વં ત્વદન્યન્ન કિઞ્ચિદ્ધ્રુવં સત્યમેતદ્ધ્રુવં સત્યમેતત્ ॥ ૫૬૧॥

શિવાત્પરં નેતિ વદન્તિ વેદાઃ શિવાત્પરં નેતિ વદન્તિ દેવાઃ ।
શિવાત્પરં નેતિ વદન્તિ સિદ્ધાઃ શિવાત્પરં નેતિ વદન્તિ શુદ્ધાઃ ॥ ૫૬૨॥

શિવ એવાખિલારાધ્યઃ શિવ એવ જગત્પ્રભુઃ ।
ન શિવાત્પરમસ્ત્યેકં સત્યં સત્યં મયોચ્યતે ॥ ૫૬૩॥

શિવાજ્ઞયૈવ સૂર્યોઽયં તપતિ પ્રતિવાસરમ્ ।
શિવાજ્ઞયૈવ ચન્દ્રોઽયં દીપયત્યખિલા દિશઃ ॥ ૫૬૪॥

શિવાજ્ઞયૈવ શૈલેન્દ્રાઃ ફણિદિક્કરિણઃ સદા ।
ધૃત્વા તિષ્ઠન્તિ પૃથિવીં ભીત્યા કમ્પિતમાનસાઃ ॥ ૫૬૫॥

શિવાજ્ઞયૈવ નિતરાં પ્રજ્વલત્યનલઃ સદા ।
શિવાજ્ઞયૈવ વાન્ત્યેતે વાયવઃ સુખહેતવઃ ॥ ૫૬૬॥

શિવસ્યૈવ પ્રસાદેન દેવેન્દ્રઃ સર્વપાલકઃ ।
શિવસ્યૈવ પ્રસાદેન સર્જકોઽપિ પ્રજાપતિઃ ॥ ૫૬૭॥

શિવસ્યૈવ પ્રસાદેન મયા પ્રાપ્તં પરં પદમ્ ।
શિવસ્યૈવ પ્રસાદેન શમ્ભુઃ શમ્ભુત્વમાપ્તવાન્ ॥ ૫૬૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૧ । ૫૫૦-૫૬૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 550-568..

Proofread by Ruma Dewan

*Vishnukritam Shiva Stotram 2*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*